# Dvijaprokta Darshanoparanta Shiva Stuti 1

# દ્વિજપ્રોક્તા દર્શનોપરાન્ત શિવસ્તુતિઃ ૧

## Document Information

Text title : Dvijaprokta Darshanoparanta Shiva Stuti 1

File name : dvijaproktAdarshanoparAntashivastutiH1.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 25| 51-60||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# દ્વિજપ્રોક્તા દર્શનોપરાન્ત શિવસ્તુતિઃ ૧

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

દ્વિજઃ (ઉવાચ)

કૃતાર્થોઽસ્મિ મહાદેવ ત્વત્પાદામ્બુજદર્શનાત્ ।
યદિદં ચિન્ત્યતે નિત્યં યોગિભિર્યોગતત્પરૈઃ ॥ ૫૧॥

તદિદં પાદકમલં તવ દેવોત્તમ પ્રભો ।
સર્વદેવસ્તુતં નિત્યં દૃષ્ટં ભાગ્યવશાન્મયા ॥ ૫૨॥

યદ્વિષ્ણુનેત્રપદ્મેન પૂજિતં ત્વત્પદામ્બુજમ્ ।
સર્વામરગણારાધ્યં દૃષ્ટં ભાગ્યવશાન્મયા ॥ ૫૩॥

ઇદમત્યુત્તમં રૂપં દૃષ્ટં કેનાપિ ન પ્રભો ।
દૃષ્ટમદ્ય મયા શમ્ભો ત્વત્પ્રસાદેન મોક્ષદમ્ ॥ ૫૪॥

ભક્તિસ્ત્વય્યેવ સતતં મમાસ્ત્વવ્યભિચારિણી ।
નિત્યં તવૈવ પૂજાયાં ભતિરસ્તુ મમ પ્રભો ॥ ૫૫॥

તવ નામજપે ભક્તિર્મમાસ્ત્વન્વહમીશ્વર ।
ભક્તિરસ્ત્વનિશં શમ્ભો તવ નામાનુકીર્તને ॥ ૫૬॥

નિત્યં મમ મનોભૃઙ્ગસ્તવૈવ ચરણામ્બુજે ।
સઞ્ચરત્વતિસન્તુષ્ટો મોક્ષપુણ્યરસાન્વિતઃ ॥ ૫૭॥

ત્વત્પાદકમલદ્વન્દ્વે દ્વન્દ્વદુઃખનિવારકે ।
વિષ્ણુનેત્રાર્ચિતે નિત્યં પ્રીતિરસ્તુ મહેશ્વર ॥ ૫૮॥

મમાસ્તુ ભક્તિરનિશં ભસ્મરુદ્રાક્ષધારણે ।
મમાસ્તુ ભક્તિરનિશં શિવભક્તાભિપૂજને ॥ ૫૯॥

શમ્ભો શિવ શિવેત્યેવ વદતો મમ શઙ્કર ।
ભસ્મરુદ્રાક્ષવપુષસ્તનુત્યાગોઽસ્તુ મોક્ષદ ॥ ૬૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે દ્વિજપ્રોક્તા દર્શનોપરાન્ત શિવસ્તુતિઃ ૧ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૫। ૫૧-૬૦॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 25 . 51-60..

Proofread by Ruma Dewan

*Dvijaprokta Darshanoparanta Shiva Stuti 1*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*